॥ ओ३म् ॥

अनित्यानि शरीराणि
विभवो नैव शाश्वतः।
नित्यं सन्निहितो मृत्युः
कर्तव्यो धर्मसंग्रहः॥
(चाणक्य-नीति)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-21/5379/2014-2016

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत-संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com मूल्यम्-रू. ५/- द्विवार्षिक शुल्कम्-रू. २४०/-

॥ ओ३म् ॥

कामो नष्टतनुर्बलिदितिसुतो
नित्यं पशुः कामगौ-
नेतांस्ते तुलयामि भो
रघुपते कस्योपमा दीयते॥
(चाणक्य-नीति)

देहली 卐 वर्षम्-५ 卐 अंकः-८ (१०४) 卐 १६ अक्टूबरमासः २०१५तः ३१ अक्टूबरमासः २०१५ पर्यन्तम् 卐 विक्रमसंवत्-२०७२ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

### राष्ट्रियंसंस्कृतसंस्थानस्य षट्चत्वारिंशततमः स्थापनादिवससमारोहः

## संस्कृतस्य ज्ञानाय इतिहासस्य परिज्ञानमावश्यकम् -प्रो.वी.कुटुम्बशास्त्री

नवदेहली । सुप्रसिद्धैः संस्कृतज्ञैः प्रो.वी.कुटुम्बशास्त्रीमहोदयेन कथितं यत् संस्कृतस्य ज्ञानाय इतिहासस्य परिज्ञानमावश्यकम् । ते राष्ट्रियसंस्कृतसंस्थानस्य षट्चत्वारिंशतमस्य



स्थापानादिवससमारोहस्यावसरे प्रमुखवक्तृरूपेण विषयप्रतिपादनं कृतवन्तः । प्रो.शास्त्रीमहोदयेन कथितं यत् ऋग्वेदः कस्यामपि भाषायां निबद्धः प्रथमो ग्रन्थः वर्तते । ऋग्वेदस्य प्रत्येकं मन्त्रः छन्दोबद्धमस्ति अनेन च ज्ञायते यत् छन्दांसि ऋग्वेदादपि प्राचीनाः । अतश्च कस्यापि परम्परायाः परिज्ञानाय तस्याः ऐतिह्यं ध्यातव्यं भवति । अनेन एव वयं संस्कृतस्य प्राचीनतां परिज्ञातुं शक्नुमः तेनैव च भारतस्य प्राचीनता सिद्ध्यति ।

राष्ट्रियसंस्कृतसंस्थानेन अक्तूबरमासस्य पञ्चदशते दिनांके षट्चत्वारिंशततमं स्थापनादिवसकार्यक्रमः समायोजितः । संस्थानस्य कुलपतिभिः प्रो.परमेश्वरनारायणशास्त्रीमहोदयेन कार्यक्रमस्य अध्यक्षता कृता । संस्थानस्य पूर्वकुलपतयः प्रो.वेम्पटिकुटुम्बशास्त्रीमहोदयाः मुख्यातिथिरूपेण उपस्थिताः आसन् ।

भारतसर्वकारेण राष्ट्रियसंस्कृतसंस्थानस्य स्थापना नवदेहल्यां 1970तमे वर्षे अक्तूबरमासस्य पञ्चदशे दिनांके कृता आसीत् । पृथक् स्वायत्तसंस्था एषा । अस्य च सम्पूर्णव्ययः मानवसंसाधनविकासमन्त्रालयेन भारतसर्वकारेण निर्वाह्यते । संस्थानोऽयं सम्पूर्णे भारतवर्षे संस्कृतभाषायाः शास्त्रपरम्पराणां च प्रचार-प्रसारस्य




संरक्षणनिकायरूपेण कार्यं करोति । विश्वविद्यालयानुदानायागस्य अनुशंसायां मानवसंसाधनविकासमन्त्रालयेन राष्ट्रियसंस्कृतसंस्थानं 2002तमे वर्षे समविश्वविद्यालयरूपेण उद्घोषितम् । वर्तमाने राष्ट्रियसंस्कृतसंस्थानं देशस्य विभिन्नभागेषु एकादशपरिसराणां षडविंशतिआदर्शमहाविद्यालयानां शोधसंस्थानानां च सञ्चालनं कुर्वन्नस्ति । दूरस्थशिक्षामाध्यमेन संस्कृतस्य प्रचाराय प्रसाराय च संस्थानेन 2010तमे वर्षे मुक्तस्वाध्यायपीठस्य स्थापना कृता । अस्यान्तर्गतं त्रिसहस्रछात्राः विविधानां शास्त्राणां शिक्षा प्राप्तवन्तः । कार्यक्रमस्यास्य उद्घाटनं दीपप्रज्वालनेन संरस्वतीवन्दनया चानन्तरं वाचिकं स्वागतं प्रो.सर्वनारायणझामहोदयेन कृतम् ।

कार्यक्रमस्य अध्यक्षीय सम्भाषणे प्रो. परमेश्वरनारायणशास्त्रीमहोदयेन राष्ट्रियसंस्कृतसंस्थानस्य विगतवर्षस्य उपलब्धिनां चर्चा कृता तथा च संस्कृते नवाचारस्य अभिनवसंभावनानां च उल्लेखं कृतम् ।

अस्मिन् अवसरे संस्थाने समायोजिते हिन्दीपखवाडाकार्यक्रमे प्रथम-द्वितीयस्थानं प्राप्तकर्तृणः कर्मचारिणः पुरस्कृताः । धन्यवादं च डॉ.रत्नमोहनझामहोदयेन ज्ञापितम् । अस्मिन् कार्यक्रमे संस्कृतकवयः प्रो.अभिराजराजेन्द्रमिश्रमहोदयः, प्रो. रमाकान्तपाण्डेयमहोदयः प्रो.मनोजमिश्रमहोदयः, प्रो.सुब्रह्मण्यमशर्मा, डॉ.पी.एन.वत्समहोदयः, श्रीमतिएस.पी.मेननमहोदया, डॉ.कू. वेंकटेशमूर्तिमहोदयः, डॉ.हनीफखानमहोदयः, डॉ.रजनीशशुक्लः, डॉ. अंभिजितमहोदयः अपि चान्ये अधिकारिणः उपस्थिताः आसन् ।

## शरीर-मन-आत्मानां समत्वं योग उच्यते -प्रो.गणेशदत्तशर्मा

नवदेहली । दिल्लीसंस्कृताकादम्या दिल्लीसर्वकारेण अकादम्या सभागारे - आधुनिकजीवनेयोगस्य प्रासंगिकता' इत्यस्मिन् विज़ये



संगोष्ठ्याः आयोजनं कृतम् । अस्मिन् अवसरे मुख्यतिथिरूपेण दिल्लीसंस्कृताकादम्या उपाध्यक्षः प्रो. गणेशदत्तशर्मामहोदयैः कथितं यत् योगः भारतीयदर्शनस्य महत्वपूर्णमङ्गं वर्तते । योगः सम्पूर्णतया आध्यत्मिकी प्रक्रिया वर्तते । योगस्य उत्पत्तिः भारते एव अभवत् । शरीर-मन-आत्मानां समत्वं योग उच्यते । भारतदेशात् बौद्धधर्मेण योगः चीन-जापान-तिब्बत-दक्षिणपूर्वेशियादेशेषु श्रीलंकायां च प्राप्तः । वर्तमाने समग्रे विश्वे योगस्य महत्वमारोग्यार्थं दृश्यते । संयुक्तराष्ट्रसंघेनापि योगस्य महत्वं ज्ञात्वा जूनमासस्य एकविंशतितमः दिनांकः अन्ताराष्ट्रिययोगदिवसरूपेण उद्घोषितम् । श्रीमद्भगवद्गीतायां कथितं यत् योगः कर्मसु कौशलम् । केचन् जीवात्मनः परमात्मना संयोगः योग उच्यते । अद्यत्वे त्वरितगतिमानसमये योगस्यावश्यकता सर्वविदितमेव । नियमित-योगाभ्यासेन शरीरस्य मनसश्च स्वस्थता कल्पिता ।

अस्मिन् अवसरे अकादम्या सचिवैः डॉ.जीतरामभट्टमहोदयेन कथितं यत् योगः महर्षि पातञ्जलिना सूत्र रूपेण प्रस्तुतम् । योगस्य च कृते विविधाः परिभाषाः प्रदत्ताः । अस्मिन् क्रमे योगदर्शने, सांख्यदर्शने, विष्णुपुराणे, श्रीमद्भगवद्गीतायां च योगस्य विस्ततं वर्णनं प्राप्यते । योगस्य अष्टौ अंगाः प्रोक्ताः । ये च यम-नियमासनप्राणायां प्रत्याहारधारणाध्यानसमाधिश्च सन्ति । अस्मिन् अवसरे योगस्य विषये विस्तृतं विवेचनं प्रस्तुतम् । सर्वेषां कृते च नियमितयोगाभ्यास्य आवश्यकता सुप्रतिपादिता । अस्मिन् अवसरे नैकाः गणमान्यजनाः उपस्थिताः आसन् ।

## हिन्दूविश्वविद्यालये संस्कृतविभागे त्रिदिवसीय-अन्ताराष्ट्रियसंगोष्ठ्याः आयोजनम्

काशी । काशीहिन्दूविश्वविद्यालये शताब्दीवर्षस्योपलक्ष्ये संस्कृतविभागे कलासंकाये त्रिदिवसीय-अन्ताराष्ट्रियशोधसंगोष्ठ्याः



आयोजनं सितम्बरमासे अभवत् । संगोष्ठ्याः विषयः संस्कृते भारतीयकलायाः सौन्दर्यस्य च तत्वम् ।

अस्य उद्घाटनसत्रे अध्यक्षतां कुर्वन् संस्कृतविभागस्य पूर्वविभागाध्यक्षः वरिष्ठः आचार्यः प्रो.विश्वनाथभट्टाचार्य महोदयेन कथितं यत् सौन्दर्यं लावण्यं अपरपर्यायः सौन्दर्यं च बहिरङ्गः । विषयप्रवर्तकेन प्रो.कमलेशदत्तत्रिपाठीमहोदयेन प्रतिपादितं यत् एसथेस्टिक पाश्चात्यविदुषां अवधारणा वर्तते । तेन एसथेस्टिक इति इन्द्रियानुभवमिति स्वीकृतम् । भारतीयकला एवं सौन्दर्यस्य परिदृश्ये विश्वस्य कलासौन्दर्यमवबोधयितुं प्रयासः कृतः । पेरिसदेशात् समागताः सारस्वतातिथयः पेरिसस्थस्य इन्स्टीट्यूट आफ फ्रान्स इत्यस्य सदस्याः प्रो.पी,एस,फिलिओजामहोदयेन भारतीयसाहित्ये सौन्दर्यस्यावधारणायाः महत्वं प्रतिपादितम् । नवदेहलीतः समागताः देववाणीपरिषदः संस्थापकाः पद्मश्रीविभूषिताचार्यः प्रो.रामकान्तशुक्लमहोदयेन कथितं यत् आनन्दं ददाति तत् सौन्दर्यमिति । त्रिपुरसुन्दर्यां कला सर्वत्र विद्यामाना । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य वेदविभागस्याध्यक्षः प्रो.

शेषभागःद्वितीयपुटे

ओ३म्

भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)

सत्य के प्रचारार्थ

सत्यार्थ प्रकाश

सत्य के प्रचारार्थ

| | | |
|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36-16 | मुद्रित मूल्य 50 रु. प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36-16 | मुद्रित मूल्य 80 रु. प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30-8 | मुद्रित मूल्य 150 रु. | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन

कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें

आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

प्रथमपुटस्य शेषभाग:

## हिन्दूविश्वविद्यालये संस्कृतविभागे.....

युगलकिशोरमिश्रमहोदयेन प्रतिपादितं यत् येन च प्राप्ते: उत्कण्ठा स्यात् तत् सौन्दर्यमिति । तै: नासदीयसूक्तस्य स्वधा इत्यस्य महत्वं प्रकाशितम् । पेरिसस्थ-सोर्बोनविश्वविद्यालयस्य भारत-ईरानी-अध्ययनसंकायस्य संस्कृतविभागाध्यक्षा प्रो. नलिनीबलवीरमहोदया जैनसंस्कृतौ शारीरिकं मानसिकं च सौन्दर्यं विवेचितम् । मुख्यातिथिरूपेण विद्यामाना: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतय: प्रो. अभिराजराजेन्द्रमिश्रमहोदयै: कथितं यत् डार्विनफ्रायडादय: सौन्दर्यस्य विवेचनं कृतवन्त: । ई.पू.षष्ठशताब्द्यामपि भारते संसकृतस्य अतीवमहत्वमासीत् यद्यपि समकालीनसंस्कृतय: विकसिता: नैव आसन् । अस्मिन् उद्घाटनसत्रे विभागाध्यक्षेण प्रो.गोपबन्धुमिश्रमहोदयेन समेजामभ्यागतानामतिथिनां च स्वागतं कृतम् । कृतज्ञताज्ञापनं च संगोष्ठ्या: आयोजनसमित्या: अध्यक्षेण प्रो.श्रीकिशारेमिश्रमहोदयेन कृतं तथा च प्रो. सदाशिवकुमारद्विवेदीमहोदयेन कार्यक्रमस्य संचालनं कृतम् । अस्मिन्नवसरे संगोष्ठ्यां प्रस्तूयमानानां शोधपत्राणां शोधपत्रसारांशिका, 2012तमे वर्षे समायोजिताया: संगोष्ठ्या: शोधपत्राणां पुस्तकाकार: स्वातन्त्रयोत्कर्ष:, विभागीयशोधपत्रिका संस्कृतसौदामिनी, वाक्यपदीयम्(ब्रह्मकाण्डम्), शब्दार्थरत्नम्, सौन्दर्यपंचाशिका, छन्दोधरा:, साहित्यशास्त्रसमुच्चय:(पंचमभाग:) ययातिचरितम्, जन्मान्धस्य स्वप्न: इत्येतेषां ग्रन्थानां लोकार्पणमभवत् ।



दिवसत्रयाणां संगोष्ठ्यां विविधशैक्षणिकसत्रेषु निर्धारितविषये चतुर्शताधिकशोधपत्राणां वाचनं विभिन्नेभ्य: संस्थानेभ्य समागतविद्वदिभ: शोधच्छात्रैश्च कृतम् । अस्मिन् क्रमे पञ्चविशिष्टसत्रेजु विशिष्टविदुषां व्याख्यानानि समायोजितानि । निर्धारितविषये संस्कृते उपनिबद्धानां शास्त्राणां विषये पुरातत्व-संस्कृति-मूर्तिशिल्प-पाण्डुलिपि-भाषाविज्ञान-भारतीयपाश्चात्यानां च विदूषां मते सौन्दर्यस्य अवधारणा चर्चिता । संगोष्ठ्यां हिन्दूविश्वविद्यालयतिरिक्तं नवदेहली-लखनऊ-कानपुर-इलाहाबाद-हरिद्वार-अयोध्या-गोरखपुर-रायबरेली-जबलपुर-शान्तिनिकेतन-पंजाब-महाराष्ट्र-आसाम- कलकत्ता- उडीसा- आन्धप्रदेश-केरल-राजस्थान-छतीसगढ-हिमाचलप्रदेश-बिहारादिप्रान्तेभ्य: समागतेभ्य: प्रतिभागिभि: भागं गृहीतम् । अस्यां संगोष्ठ्यां पेरिस-थाईलैण्ड-श्रीलंकादिदेशभ्य: समागत्य विद्वद्भि: भागं गृहीतम् ।

संगोष्ठ्या: सम्पूतिसत्रे विशिष्टातिथिरूपेण प्रो.राधावल्लभत्रिपाठीमहोदयेन कथितं यत् संस्कृतशास्त्रेषु परमानन्दस्वरूपदेवताया: परिस्पन्दस्य परिणामो मन्यते । अतएव सौन्दर्यं सर्वत्र विद्यमानमिति । भारतीयपरम्परायां विहीनसौन्दर्यस्यावधारणा नैव स्वीकृता । कलाया: सौन्दर्यस्य च आधारे व्यापकसंगोष्ठ्या: आयोजनं प्रप्रथममेव अभवत् । सारस्वतातिथिभि: प्रो. युगलकिशोरमिश्रमहोदयेन गोष्ठ्या: सफलायोजनस्य कृते सर्वेषां प्राध्यापकानां धन्यवादं कृतम् । मुख्यतिथि आचार्यरेवाप्रसादद्विवेदीमहोदयेन सौन्दर्यं धर्मस्यात्मा मता । तेषामनुसारं सौन्दर्यानुभूति: उभयसापेक्षवर्तते । कलासौन्दर्यस्य जननी । तै: सौन्दर्यपंचाशिकायां प्रतिपादितं सौन्दर्यसिद्धान्तं प्रस्तुतम् । समापनसत्रे अध्यक्षेण आचार्यरायत्नशुक्लमहोदयेन कथितं यत् सर्वेषु संस्कृतशास्त्रेषु सौन्दर्यस्यावधारणा विद्यमाना वर्तते । संगोष्ठ्यां संयोजकविभागाध्यक्षेण प्रो.गोपबन्धुमिश्रेण समेषामभ्यागतानां स्वागतं कृतम् । संगोष्ठ्या: अध्यक्षेण प्रो.श्रीकिशोरमिश्रेण त्रिदिवसीयसंगोष्ठ्यां विभिन्नसत्रेषु प्रस्तुतानां शोधपत्राणां विवेचनं प्रस्तुतम् । सहसंयोजिकया प्रो.मनुलताशर्मामहोदया धन्यवादज्ञापितं तथा च प्रो.उपेन्द्रपाण्डेयमहोदयेन कार्यक्रमस्यास्य संचालनं कृतम् ।

## कुलाबर्गिकवये

-कौशल तिवारी:

1. शवयात्रा
कवे!
तव शवयात्रायां
पश्यसि जनसम्मर्दम्,
तव पृष्ठभागे
ऽऽगतवन्तो जना
अनुगमनं कुर्वन्ति
शवस्यैव केवलं
न तु विचाराणाम्।
खिन्ना न सन्ति ते
न च दु:खार्तास्सन्ति,
अपि तु प्रसन्नास्सन्ति ते
यतो हि
दत्तं जीवनं त्वया
तत्कथयितुम्,
यस्य कथनस्य वार्ता तु दूरस्था
चिन्तनमप्यपराधमस्ति
तेषां कृते।
एते ये जनास्सन्ति
वस्तुतं त एव सन्ति शवा:
त्वञ्चाऽऽगतोऽसि
तेषां शवयात्रायाम्।।

2.नामावली
''डाभोलकर:,
पालेसकर:,
कुलाबर्गी......''
दीर्घा भवति नामावली
अत्र वर्तन्ते
तेषां नामानि
यैरुद्घाटितौ स्वोष्ठौ
तस्य विरुद्धं
यत्प्रतीयते स्माऽसङ्गतम्
स्वकलमेनैव
रचितं तै:
स्वशवपेटकम्,
किन्तु मा भैषी:
तव नाम
नैव भविष्यति तत्र
यतो हि
नास्त्यवकाशस्तेषां कृते तत्र
ये सन्ति मानसिकदासा:।।

## २०१४वर्षस्य राष्ट्रपतिसम्मानप्राप्तकर्तृणां संक्षिप्तपरिचय: ( ८ )


## डॉ फ्रान्स्वाग्रिमालवर्य:



डॉ.फ्रान्स्वाग्रिमालमहोदयानां जन्म फ्रांसदेशे 1945तमे वर्षे अभवत् । पेरिसविश्वविद्यालयत: सोरबोनत: लैटिन-ग्रीक-संस्कृतस्य शिक्षां गृहीत्वा भवभूतिविरचितस्य महावीरचरितस्य वीरराघवस्य च विरचिताया: टीकाया: अनुवादानामध्ययनस्य विषये पेरिसविश्वविद्यालये विद्यावारिधे: उपाधि: प्राप्ता । स्वकीयमध्यापनकार्यं 1976तमे वर्षे फ्रांसदेशस्य विभिन्नविश्वविद्यालयेषु तुलनात्मकव्याकरणस्य आचार्यरूपेण आरब्ध: अनन्तरं च 1986तमे वर्षे पेरिसविश्वविद्यालये अध्यापनकार्यं प्रारब्धम् । एतदनन्तरं पाण्डिचेरिस्थे इकलफ्रांसिसएदम्सट्रीमओरियेन्ट संस्थया सम्बद्धा: । अत्र नैकवर्षेभ्य केन्द्रस्यास्य प्रभारी रूपेण इण्डोलॉजीविभागे कार्यं कृतम् । एतासु संस्थासु विगतवर्षेषु भवद्भि: परम्परागतविदुषां सान्निध्ये शोधकार्यक्रमाणां रूपरेखानिर्माणं सञ्चालनं च कृतम् । त्रिंशाताधिकवर्षेभ्य: एतेषां विदुषां संयुक्ततत्वावधाने भवद्भि: कार्यं कृतम् । भवतां शोधस्य प्रमुखो विषय: संस्कृमस्य संस्कृतसाहित्यस्य भारतीयदृष्टिकोणे तुलनात्मकाध्ययनमेव वर्तते ।

माननीयफान्स्वाग्रिमालमहोदयानां शोधप्रबन्धस्यातिरिक्तं सम्पादितकृतीनां प्रमुखो विषय: काव्यमासीत् । शास्त्राणां क्षेत्रे भवतां कार्यं व्याकरणशास्त्रं प्रति समर्पितं दृश्यते । वर्तमानेऽपि ग्रिमालवर्य: पाणिनीयव्याकरणोदाहरणकोशस्य भागत्रयाणां प्रकाशनकार्ये संलग्ना: । कोशस्यास्य उद्देश्य: महाभाष्य-काशिकावृत्ति-भाषावृति- सिद्धान्तकौमुद्या: च उदाहरणनां माध्यमेन पाणिनीव्याकरणपद्धति: अस्य च अनुप्रयोगस्य सम्यक् परिज्ञानमेवास्ति । एतत् महनीयकार्यं शोधस्य साधनं सममेव मूलभूतशास्त्राणामध्यापने साफल्यं भजते । एतादृशेभ्य: विभिन्नेभ्य: शोधकार्येभ्य: संलग्ने सत्यपि पेरिसस्थस्य इकलपर्टिकइिउटइच्यूद इत्यस्य संस्कृतकाव्यशास्त्राध्यापनकार्येण अपि सम्बद्धा: । श्रीग्रिमालमहोदयेन नैकासां अन्ताराष्ट्रियशोधसंगोशीनां सम्मेलनानां चायोजनं कृतं नैकशोधच्छात्राणां च मार्गदर्शनमपि कृतम् ।

आवाससंकेत:
137, नीडराजपयर स्ट्रीट,
पाण्डिचेरी-605001




vedas are divine

# संस्कृतभारत्याः तमिलनाडु-राज्यसंघटनेन-चेन्नै-नगरस्थमीनाक्षी महिलामहाविद्यालये संस्कृतसम्मेलनम्

तमिलनाडु-राज्ये संस्कृतभारत्याः प्रयत्नेन महता उत्साहेन सर्वत्र संस्कृतकार्यवर्धनं भवतीति सर्वैः ज्ञातं स्यात् । प्रतिवर्षं संस्कृतदिनाचरणाङ्गतया एकसप्ताहात्मकबहुविधकार्यक्रमान् आयोज्य संस्कृत विद्यार्थिनः संस्कृतप्रचारकार्ये उत्कृष्टभागं वहन्ति संस्कृतसेवाकार्यं कुर्वन्ति च। अस्मिन् वर्षऽपि 'सामान्येभ्यः संस्कृतम्' इति विषयमधिकृत्य त्रिदिनात्मकं



प्रदर्शिनीसहितमहासंमेलनमेकं सेप्तम्बर 11, 12, 13 दिनेषु चेन्नै-नगरस्थमीनाक्षी महिलामहाविद्यालये सम्पन्नम्।अस्य कार्यक्रमस्य संयोजने तमिल्नाडुराज्यस्थ तन्जावूरुनगरस्थ शास्त्राविश्वमहाविद्यालयः विवेकानन्दा-एजुकेषनल्-सोशैट्टी मीनाक्षी- महिलामहाविद्यालयः संस्कृतभारती-संस्थाभिः सहयोगिरूपेण भागं निरवहन् । अवसरेऽस्मिन् आसमन्तात् सर्वस्मात् परिसरात् बहवो विद्वांसः, शिक्षाशास्त्राध्यापकाः, संस्कृतच्छात्राः, संस्कृताभिमानिनश्च अनेके समागत्य संस्कृतभाषायां विद्यमानानेकानि शास्त्रोपयुक्तनिकृष्टानि प्रमाणानि भाष्यसम्मतानि तथा संस्कृतविद्यायाः महत्त्वं वैशाल्यञ्च गहनतया च प्रत्यभिवदन् ।

सेप्तम्बर11तमे दिनाङ्के तत्रोद्घाटनावसरे राष्ट्रिय-इस्रो-संस्थायाः पूर्वतनाध्यक्षः श्री एस. राधाकृष्ण-महाभागाः मुख्यातिथित्वेन पूर्वतनराष्ट्रपतिअब्दुल्कलांमहोदयस्मारयितां संस्कृतपुस्तकप्रदर्शिनीं उद्घाट्य प्रदीपप्रज्वालनेन सहपूर्वाह्नकार्यक्रम 'संस्कृतम् सर्वजनव्व्यवहारेषु' इति विषयमधिकृत्य व्याख्यानमकार्षुः । माननीयाः राष्ट्रिय निर्वाचनकेन्द्रस्य पूर्वतनाध्यक्षः गोपाल्स्वामि महाभागाः, चेन्नैनगरस्थ एस.ऐ.इ.टि. महाविद्यालयस्य अध्यक्षः डाँ. मूसा रासा (ऐ.ए.एस), चेन्नैदूर्दशनन्केन्द्रस्य वार्ताविभागाध्यक्षः श्रीमान् मारियप्पन्, मीनाक्षी महिलामहाविद्यालयस्य निर्वहनाधिकारी श्रीमति लक्ष्मी, संस्कृतभारत्याः अखिलभारतीय मुख्यमन्त्री दिनेष्कामत् जि, संस्कृतभारत्याः तमिलाडुराज्यस्य अध्यक्षः साहित्य अकादमी पुरस्कारविजयेतृ डिक्रुश् महाभागः च भागं स्वीकृत्य संस्कृतस्य



साम्प्रतिकप्रासङ्गिकतां न्यरूपयन् ।


अपराह्न-कार्यक्रमाङ्गत्वेन सर्वमहाविद्यालयविद्यार्थीनां संस्कृतवाङ्मयस्य विविधान् पक्षान् अवलम्ब्य संशोधनप्रसङ्गविचाराः संस्कृतभाषामाद्यमेन समर्पिताः ।

सेप्तम्बर 12तमे दिनाङ्केविश्वप्रसिद्ध 'कार्पोरेट् चाणक्या'पुस्तक प्रबन्धकः डाँ राधाकृष्णपिल्लै महोदयेन संस्कृते विज्ञानमिति विषयेपरस्परान्वय विप्रलाप संवादः प्रवृत्तः ।अखिलेऽपि देशे विदेशे च संस्कृतवाङ्मये निहितानां ज्ञानविज्ञानानाम् आधुनिकप्रसङ्कस्थितिः 2500 वर्षेभ्यः पूर्वमेव भारतीय धर्मशास्त्र-संसर्गविद्यायाः वैज्ञानिकपरम्परायाःश्रेष्टमहापुरुषेन 'अर्थशास्त्र' ग्रन्थायाः रचयितृ कौटिल्येन कथं संस्कृतभाषा स्वकीयज्ञानवैभवेन प्रसारितासीतितिPower Point प्रदर्शनपुरःसरं प्रस्तूय महोदयेन प्रतिभातितम् ।

अपराह्नकार्यक्रमे 'मात्रु वन्दनम्' इति विषयं अधिकृत्य मधुरान्तकस्थ मालोलन् कला तथा विज्ञान महविद्यालयस्य प्राध्यक्षकस्य श्रीमती डाँ पङ्कजवर्यायाः भाषाणात्परम् कार्यक्रमस्यास्य अध्यक्षाः माननीयाः डाँ. निर्मला सीतारामन् ,राष्ट्रीय वाणिज्यमन्त्रि, संस्कृतमात्रुसेवायाम् महिलायाः सारफल्गुत्वयोगदानं कीदृशं भवतीति विस्तृतया समायोजितम् ।संस्कृतशिक्षया सह आधुनिकशिक्षाया समन्वयः कर्तव्यः परिपाल्यः च इति मान्यैःप्रतिपादितम् । तस्याः देहलीनगरस्थ 'प्रणव' नाम्नीया महिलाविद्यालये कथं ईरानीयछात्राः संस्कृतपठने उद्युक्ताः भवन्ति इति स्वकीयानुभवेन सर्वान् विस्तृत-विवरणं प्रदाय संस्कृत-विद्यायाः कृते प्रशासनेन अनुष्ठीयमानाः विविध-प्रचार-प्रयत्नाः विशदीकृताउतशिक्षणकौशलमध्यगीषिता । चेन्नैनगरस्थ उच्चन्यायालय पूर्वतन नीतिपती मान्याः श्रीमती प्रभा श्रीदेवन् एवञ्च तमिल्नाडु पुरावशेष-विभागस्य पूर्वतनाध्यक्षकः श्रीमन् नागश्वामि महोदयः वेदकालमारभ्य आधुनिककालपर्यन्तं नारीणां सांस्कृतिकसामाजिककौशलयोगदानम् कीदृशं भवतीति शिक्षाशास्त्राध्यापकानबोधयन् ।

सेप्तम्बर 13तमे दिनाङ्के'तमिल्भाषा - संस्कृतभाषा सम्बन्धः' इति विषये मेघालयाप्रादेशिक राज्यपालः श्रीमन् षण्मुखनाथस्य अध्यक्षेन चेन्नै श्री रामकृष्णामट विमूर्तानन्दा, तपोवनम् श्री रामकृष्णामट नियमानन्दा च एतेषां अनुग्रहभाषनेन चर्चा समायोजिता । श्रीमन् षण्मुखनाथः तस्य मुख्यातिथिभाषणे वेदकालत्रक्षयः लोकक्षेमार्थं कथं सर्वान् वेदान् अन्य शास्त्रान् च आविष्कृत्य बोधितवन्तः इति स्मारितवान् । 'पाश्चात्य वैज्ञानिकाः अर्नाल्ड् टायन्बी एच.जि.वेल्स् प्रभृतयः संस्कृतमेव विश्वभाषायाः साधिष्टानभाषा सर्वासंस्कृतीनां मात्रुस्वरूपा इति श्लाघितवन्तः । प्रसिद्ध सापेक्षता-वाद भौतशास्त्र वैज्ञानिकः ऐन्स्टीन् अपि तस्य नोबेल् पुरस्कारस्य आधारश्रुति अस्माकम् उपनिषदाः एव इति प्रस्तूयते' इति तस्य भाषणे घोषितमासीत् ।

कार्यक्रमस्य सञ्चालने तमिल्नाडु संस्कृतभारत्याः सचिवः डाँ रामचन्द्रमहोदयेन अतिथिवर्याणां स्वागतम् व्याहृतम् । संस्कृतभारत्याः मुख्यप्रमुखः डाँ जयरामः त्रिदिवसेभ्यः आगताः संस्कृतसम्भाषणशिविराणां प्रतिभागिनः, महिलाः, बालाः, वृद्धाः, नागरिकाः, सर्वें मुद्रणालय प्रतिनिदयः, प्रदर्शिनिभागदेयः सर्वेभ्यः धन्यवादवचनं व्याहरत्।



# सम्पादकीयम्

## देशे परिवर्द्धमानायाः धर्मान्ध-तायाः असहिष्णुतायाश्च विरुद्धं संस्कृतविश्वम्

परिवर्धमानायाः धर्मान्धतायाः साम्प्रदिकतायाः असहिष्णुतायाश्च विरोधे समग्रदेशस्य साहित्याकारैः लेखकैश्च रोषं प्रदर्शितम् । विरोधस्वरूपं बहुभिः साहित्यकारैः 'साहित्याकादम्या प्रदत्ताः पुरस्काराः प्रत्यर्पिताः । विरोधे चास्मिन् समग्रलेखकसमुदाये मतैक्यं नास्ति । अस्य विरोधस्य प्रारम्भः राजस्थानस्य युवा-संस्कृतकविना कौशलतिवारीमहोदयेन कृतम् । तेन कथितं यत् देशे परिवर्धमानायाः साम्प्रदिकतायाः असहिष्णुतायाः च विरुद्धं समये संस्कृतविश्वेन विरोधं नैव कृतं तदा इतिहासे अक्षम्यो भविष्यति एष अपराधः । सोशलमिडिया माध्यमेन अस्मिन् एव क्रमे सुप्रसिद्धैः कविभिः विचारकैः प्रो.राधाबल्लभत्रिपाठीमहोदयैः समाजे धर्मे धर्मान्धतायां चान्तरं विचिन्त्य धर्मस्य नाम्ना क्रियमाणेन दुराचारस्य भृशं निन्दा कृता । तैः साहित्याकादम्या स्वायत्तायां निष्ठां प्रदर्शय साहित्यकारैः पुरस्कारप्रत्यपर्णस्य कृत्यमनावश्यकमिति कथितम् । तैः साहित्याकादम्या शीघ्रमेव प्रभावशालीरीत्या अविरोधस्य स्थितौ साहित्याकादम्याः पदत्यागस्य वार्ता कथिता । अनेनैव प्रकारेण केचन् संस्कृतविद्वद्भिः श्रीप्रवीणपाण्डेय-डॉराजकुमारमिश्रादिभिः लेखनाभिव्यक्तेः स्वतन्त्रतायाश्च पक्षे स्वकीयं विरोध प्रदर्शितम् । आशास्महे यत् सम्पूर्णदेशे साहित्यकाराणां बुद्धिजीविनां कृत्येनानेन सकारात्मको प्रभावो भवेदिति । देशस्य व्यवस्था अवश्यमेव उचितमार्गग्रहणे बाध्या भवेदिति ।

### लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्पृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमम्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रियन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# पुराणानां महत्त्वम्

**पुराण-शब्दार्थः**:- किं तावत् पुराणमिति जिज्ञासायां पुराण-शब्दार्थो बहुधा निरूच्यते। काश्चन निरूक्तयोऽत्र समासतो निर्दिश्यन्ते। (1) पुराणम् आख्यानं पुराणम् इति, अर्थात् प्राचीनानि आख्यानानि पुराणानीति। (2) यस्मात् पुरा हि अनति इदं पुराणम् (वायुपुराण 1.203), यत् पुरा सजीवम् आसीत् तत् पुराणम्। (3) जगतः प्रागवस्थाम् अनुक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्, संसारोत्पत्तेः विकासक्रमस्य च बोधकं पुराणम्। (4) पुरार्थेषु आनयतीति पुराणं पुरूष-प्रकृत्यादि-पूर्वतत्त्वचिन्तनपरं पुराणमिति। (5) पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्, प्राचीन-परम्परा-प्रतिपादका ग्रन्थाः पुराणमिति। (6) विश्वसृष्टेरितिहासः पुराणम्। विश्वरचनाया ऐतिह्यमेव पुराणशब्दाभिमतम्। 18 पुराणानि, 18 उपपुराणानि च पुराणनाम्ना व्यवह्रियन्ते।

**पुराणं पञ्चलक्षणम्**- प्रतिपाद्यविषयम् आश्रित्य पुराणानां पञ्च लक्षणानि निर्दिश्यन्ते-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥**[1]

परन्तु श्रीमदद्भागवतादिषु ग्रन्थेषु पुराणस्य दशलक्षणं प्रतिपादितमस्ति। यथा-

**सर्गश्चाथ विसर्गश्च वृत्तिः रक्षान्तराणि च।**
**वंशो वंशानुचरितं संस्था हेतुरपाश्रयः॥**[2]

पुराणेषु पञ्चतत्वानां समावेशोऽपेक्ष्यते।

1. सर्गः-सृष्ट्युत्पत्ति-वर्णनम्।
2. प्रतिसर्गः-प्रलयस्य, सृष्टेः पुनरूद्भवस्य च वर्णनम्।
3. वंशः-देवानां ऋषिणां च वंशावल्या वर्णनम्।
4. मन्वन्तराणि-प्रत्येकस्य मनोः कालः, तत्कालः-घटितानां वृत्तानां च वर्णनम्।
5. वंशानुचरितम्-सूर्य-चन्द्रादि-वंशजानां नृपाणाम् इतिवृत्तात्मकं वर्णनम्। पञ्चलक्षणमिति सामान्यो निर्देशः। नैतेन सर्वविषय-संग्राहकत्वम्। विषयान्तराणापि पुराणेषु सद्भावात्, पञ्चलक्षणस्य च क्वचित् परिहारात्।

**पुराणानां रचनाकालः**-

पुराणानां रचनाकालः ६०० ईसवीयपूर्वादारभ्य ५०० ईसवीयसंवत्सरं यावत् स्वीक्रियते।

**पुराणेषु प्रतिपाद्या विषयाः**-

पुराणेषु मुख्यतो निम्नाङ्कितानां तथ्यानां वर्णनम् अवाप्यते-

1. कस्यचिद् देवस्य कस्याश्चिद् देव्या वोपसना। तस्यैव देवस्य सर्वोत्कृष्टता प्रतिपादनं च।
2. ब्रह्म-विष्णु- महेशेषु कस्याप्येकस्य इष्टदेवत्वेन वर्णनम्।
3. सृष्टेरूत्पत्तेः स्थितेः प्रलयस्य च वर्णनम्।
4. देवानाम् ऋषिणां च वंशावलिः तज्जीवनवृत्तं च।
5. मनोः मन्वन्तरस्य च वर्णनम्।
6. नन्द-मौर्य-शुङ्ग-आन्ध्र-गुप्तादिवंशजानां नृपाणां भूपतीनां च इतिवृत्त-वर्णनम्।
7. तीर्थानां प्रथितभौगोलिकस्थानानां तीर्थयात्रादीनां च वर्णनम्।
8. व्रत-जप-उपवास-प्रार्थनादीनां सानुशनं वर्णनम्।
9. अवतारवादस्य मूर्तिपूजाया विविधदेवोपासनायाश्च संस्थापना।
10. सगुणोपासनाया भक्तिमार्गस्य च प्राधान्येन प्रतिपादनम्।
11. दार्शनिक-धार्मिक-राजनीतिक-आचारशास्त्रादि-महत्त्वभाजां विषयाणां विवेचनं विश्लेषणं च।
12. व्याकरण-काव्यशास्त्र-ज्योतिःशास्त्र-शरीरविज्ञान-आयुर्वेदादि-शास्त्रीयाणां वैज्ञानिकानां च विषयाणां तथ्यसंकलनम्।

**पुराणां महत्त्वम्**-

भारतीयायाः संस्कृतेः सभ्यतायाश्च यथायथम् अवगमाय पुराणानां नितरां महत्त्वमस्ति। पुराणानि विहाय न क्वचिदन्यत्र विपुलेऽपि वाङ्मये प्राचीनसंस्कृतेः सविस्तरं वर्णनम् उपलभ्यते। अतएव वायुपुराणे तन्महत्त्वम् उद्घोष्यते यत् चतुर्वेदविदपि पुराणज्ञानविहीनो न विचक्षणपदवीम् आरोढुं शक्नोति। उक्तं च-

**यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।**
**न चेत् पुराणं स विद्यात् नैव स स्याद् विचक्षणः॥**[3]

पुराणानां धर्मार्थकामोक्षात्मक-चतुर्वर्ग-साधनाद् वेदत्वं प्रतिपाद्यते। पुराणं पञ्चमो वेद इत्यादिर्यते। उक्तं च भागवते-

**इतिहासपुराणं च पञ्चमो वेद उच्यते॥**

सर्वजनहिताय सर्वजनबोधाय च प्रसादगुणोपेतायाः पद्धत्याः समाश्रयेण पुराणानां महत्त्वं प्रतिपदम् आलक्ष्यते। आबालवृद्धं पुराणानां प्रियत्वं न कस्यचिद् विपश्चितो विप्रतिपत्तेर्विषयः। कथाख्यानाश्रयेण निगूढतत्त्वनिरूपणं सरलतया तदभिव्यक्तिश्च पुराणानां महत्त्वम् एधयति। पुराणानां तादृशी मनोहरा शैली भावाभिव्यक्ति-प्रक्रिया च यथा ज्ञानलव-दुर्विदग्धोऽपि मानवो विविधविषयावगाहि ज्ञानं सरलतया अवाप्नोति। पुराणेषु क्वचिद् काव्यच्छटा, क्वचित् ज्ञानस्योदयः, क्वचिचद् तत्त्वार्थचिन्ता, क्वचिद् कर्तव्योद्बोधनम्, क्वचिद् ज्ञानमीमांसा च ऐन्द्रधनुज़ीम् आभां विस्तारयति।

पुराणानां तादृशं महत्त्वं यथा- 'भिन्नरूचिर्हि लोकः' स्वरूचिम् अनुसृत्य प्रवृत्तोऽपि स्वेष्टं प्रतिगृह्णाति। विदुषे तत्त्वज्ञानविषयाः, बालिशाय शृङ्गाररसरूचिराणि आख्यानि, नीतिज्ञाय नीतितत्त्वानि, राज्ञे राजकर्माणि, व्यवहारिणे अर्थागमसाधनानि, अध्यात्मदृशे ब्रह्मतत्त्वमीमांसा, वनिताभ्यो भक्तिमार्गः, जिज्ञासवे भूगोल-ऐतिह्यादि-सम्बन्द्धा विज्ञयाः, यथायथं तच्चित्तावर्जकत्वेन प्रवर्तन्ते।

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्**-

महाभारतकृता वेदार्थस्य विशदीकरणं पुराणानां महत्त्वरूपेण प्रतिपाद्यते। वेदेषु यानि तत्त्वानि यत्र तत्र वर्ण्यन्ते तेषां विशदीकरणं पुराणेषु आख्यानरूपेण प्राप्यते। वेदार्थविशदीकरणेन पुराणानि वेदार्थावगमे साहाय्यम् आचरन्ति।

पुराणानां धार्मिकं महत्त्वं कस्य न विपश्चितो विदितम्। पुराणानि भारतीय संस्कृतेः सनातनधर्मस्य च प्राणभूतानि सन्ति। एतेषामपि श्रुतितुल्यं प्रामाण्यं गृह्यते। विष्णु-शिवादि-देवानाम् उपासनापद्धतेः सविस्तरो बोधः पुराणैरेव संजायते।

ऐतिह्यादृष्ट्याऽपि पुराणानाम् अतुलं महत्त्वम्। भारतीयैतिह्यस्य अज्ञात इतिहासो राजानं परीक्षितम् आरभ्य पद्मनन्दं यावत् पुराणेष्वेवोपलभ्यते। विष्णुपुराणे मौर्यवंशावलिः, मत्स्यपुराणे आन्ध्रवंशावलिः, वायुपुराणे गुप्तवंशावलिः च साम्प्रतं पुरातत्त्वविद्भिः प्रामाण्यस्वरूपेण उररीक्रियते। पुराणेषु प्राप्या आभीर-शक-यवन-तुज़ार- हूणादि-राजवंशानां वंशावली ऐतिह्यविदां कृते बहुमूल्यस्वरूपा।

पुराणानां भौगोलिकमपि महत्त्वं वर्तते। एषु चतुर्द्वीपाया वसुमत्याः, सप्तद्वीपाया वसुमत्याः, 18 द्वीपानाम्, 14 भुवनानाम्, क्षीरसागरादीनां वर्णनम्, भूविभाजनम्, तीर्थानाम्, सागराणाम्, सरिताम्, गिरीणाम्, भौगोलिकमहत्त्वभाजाम्, अन्येषां च स्थानानां यत्र तत्र वर्णनं भूगोल-खगोलविदां कृते विशिष्टं महत्त्वं आधत्ते।

पुराणानां सामाजिकमपि महत्त्वम् अवर्णनीयम्। पुराणेषु वर्णाश्रमव्यवस्थाम् आश्रित्य गुणानां कर्मणां च वर्णनम्, विविध संस्काराणां विवरणम्, पारिवारिक-सम्बन्धस्य विस्तरशो विवेचनम्, गुरूशिष्यसम्बन्धस्य वैशिष्ट्येन समुपस्थापनम्, राजधर्मादिवर्णनं च तेषां समाजशास्त्रीयं महत्त्वम् उपस्थापयति।

पुराणेषु विविधा विद्या यथास्थानं वर्ण्यन्ते। क्वचिद् व्याकरणम्, क्वचिद् छन्दः, क्वचिद् ज्योतिषम्, क्वचिद् धर्मशास्त्रम्, क्वचिद् आयुर्वेदः, क्वचिद् शरीरविज्ञानादिकं च तेषां शास्त्रीयं वैज्ञानिकं च महत्त्वं समर्थयन्ते। पुराणेषु अग्निपुराणं विविधशास्त्रीयज्ञान समन्वितत्वाद् विश्वकोशः स्वीक्रियते। एवं पुराणानां महत्त्वं सर्वथा प्रसिध्यति। उक्तं च नारदीयपुराणे-

**वेदार्थादधिकं मन्ये पुराणार्थं वरानने।**
**वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः॥**

**(Footnotes)**

1 **विष्णुपुराणम्**-३/६/२६
2 **भागवतपुराणम्**-१२/७/९
3 **वायुपुराण**

# विज्ञानसंस्कृतिः

-जि. एस. श्रीनिवास मूर्तिः
(murthygss@gmail.com)

[पञ्चमात्राग्रथितगणचतुष्टयमत्र
तादृशाः पञ्चपादाः षष्ठपादे तु
अधिकगुरुरन्तेऽस्ति षट्पदीत्यभिधीयते]

कुत इदं कथमिदं किमिदं कदा कुत्र
सम्पद्यते इति प्रविचार्य सर्वतः
कृत्वा प्रयोगांश्च मेयानि मित्वा च
मतिमूलतर्कविधिनैव संशोध्य खलु
परिशीलनं विना न श्रद्धधानाश्च
विज्ञानसंस्कृतेस्ताडयत जयडिण्डिमम् ॥ 1 ॥

किं ववौ मारुतो मन्थरं मृदुलं च
किं रवेरातपः प्रखरतां नाभजत्
किं पुष्पवृष्टिरभवन्नभोमण्डलात्
गलिलियो गलिलै यदा जनिमवाप्तवान्
यस्माद् हि विज्ञानसंस्कृतिः प्रारभत
तत्संस्कृतेरेव ताडयत जयडिण्डिमम् ॥ 2 ॥

प्रक्रियामुपयुज्य गणितस्य समुचिते
प्रतिरूपसर्जने सरलतामवलम्ब्य
दृष्टतथ्यानां निरूपणे सक्षमाः
नूत्नतथ्याविष्करणनिपुणकल्पनाः
विरचयन् विज्ञानसंस्कृतिर्विजयते
तत्संस्कृतेरेव ताडयत जयडिण्डिमम् ॥ 3 ॥

भूजीवविज्ञानवलयेषु नास्ति चेत्
शक्यं प्रयोगनिर्माणमवलोकनैः
साक्ष्यानि संपाद्य कल्पनां संसाध्य
साक्ष्येतरे नूत्नकल्पनासफलता
भवति चेत् तां घोषयेदितरधीमताम्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 4 ॥

विश्वस्य तत्त्वमतिसरलं च सुन्दरम्
मन्यमानास्तस्य मार्गणे शेमुर्षी
सततं प्रयुज्य ते सत्यसंशोधकाः
विज्ञानगतिपथे प्राचलन् रंहसा
नाशयन्तो मौढ्यजालानि सर्वथा
तत्संस्कृतेरेव ताडयत जयडिंडिमम् ॥ 5 ॥

योहान्न केप्लरः ब्राहेउपाह्वस्य
टैखोऽभिधेयस्य दीर्घकालात्तबहु
-मूल्यावलोकनानाधृत्य सुन्दरं
नियमत्रयं कथितवानहो भास्वरो
ग्रहाणामिनपरिक्रमणगतिमुद्दिश्य
विज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 6 ॥

दूरदर्शकयन्त्रमवलोकयत तत्र
दृश्यते विश्वेऽस्मदल्पता सुविशदम्
सूक्ष्मदर्शकयन्त्रमस्मच्छरीरस्य
पृथुतां प्रदर्शयति शंसाम कुशलतां
एकाग्रचित्ततामेवंविधानि यैः
सृष्टानि तेषां च ताडयत जयडिंडिमम् ॥ 7 ॥

को न जानाति तं मतिमतामग्रणीम्
न्यूटनं येन खलु चलननियमत्रयम्
सार्वलौकिकतत्त्वरूपेण वर्णितम्
येन सर्वद्रव्यगुणसमाकर्षणशक्ति-
रन्योन्यमुत्पद्यते नियतमित्युक्त-
मथ तस्य संस्कृतेस्ताडयत जयडिंडिमम् ॥ 8 ॥

हार्वे उपाह्वं विलियमं चिकित्सकम्
यो प्रयोगान् बहून् मनुजेषु निर्वर्त्य
रक्तचलनक्रियां हृदयस्य पात्रमपि
सम्यङ्न्यरूपयत् वैद्यशास्त्रप्रथन-
मूलकारणमभूत् तं कृतज्ञाः स्मरत
तस्येष्टसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 9 ॥

जेम्स् वाट इति नाम यस्य प्रथितमस्ति
यो प्रयोगान् बहून् सूक्ष्मान्श्च निर्वर्त्य
तप्तबाष्पच्छन्नशक्तिचालितयन्त्र-
माविश्चकार यत् प्रोद्योगरङ्गस्य
परिवर्तने श्रेष्ठपात्राणि निरवहत्
तस्य वरसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 10 ॥

लव्वासियेर्वर्यमाधुनिकरसशास्त्र-
जनक इति विख्यातमाम्लजनको येन
उत्पादितो स्वप्रयोगालये दीप्त-
जलजनकतो जलं भवतीति दर्शितम्
स्मरन्तो तं च तद्विज्ञानकर्माणि
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 11 ॥

एड्वर्डजेन्नरःजनपदप्रत्ययम्
ह्यवलम्ब्य मारकमसूरिकावारणे
सफलतां प्राप्य खलु भूतले प्रथमतो
आविष्चकार भीषणरोगयन्त्रणं
रोगरोधकवेधनीतन्त्रमार्गेण
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 12 ॥

डाल्टनमहाशयं यो मूलवस्तूनि
समगुणैः परमाणुभिः कृतानीत्युचित-
भिन्नपरमाणुसंयोगात् हि संयुक्त-
वस्तूनि सिध्यन्ति चेत्याह संस्मृत्य
रसशास्त्रवर्धनाग्रेसरं ज्ञानिनम्
तद्ज्ञानसंस्कृतेस्ताडयत जयडिण्डिमम् ॥ 13 ॥

मैकेलफारडे इति नाम यस्य यो
चलदयस्कान्तस्य निकटे स्थिते लोह-
सूत्रे तडिच्छक्तिरनुभूयते इति
प्रोद्योगपरिवर्तकं तत्त्वमकथयत्
तं लोहकारस्य तनयं प्रशस्य भोः
तज्ज्ञानसम्स्कृतेस्ताडयत जयडिंडिमम् ॥ 14 ॥

प्राकृतिकचयनाद् हि जीववैविध्यमिति
विज्ञानपरिवर्तकं तत्त्वमकथयत्
संगृह्य जन्तून्स्तदस्थ्यादिशेषान्श्च
पाषाणभूतान्श्च विज्ञानशेखरः
तं डार्विनं चार्लसाभिधं संस्मृत्य
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 15 ॥

करसहस्राद् यन्त्रमेकं समर्थं हि
तैलखनिजाङ्गारबाष्पचालितमहो
द्रुतगतौ प्रचलन्ति यानानि खे जले
भूमौ च यैर्निर्मितानि नैपुण्येन
तान् कर्मयोगिनो संस्मृत्य सविनयम्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 16 ॥

सूक्ष्मविषकृमिभिर्ह्यनेकरोगोद्भवो
भवतीति साधितं सूक्ष्मप्रयोगैश्च
निःशक्तकृमिमूलभेषजान्युपयुज्य
नैकरोगा येन वारिता प्रथमतो
तं लूयिपेस्चरं संस्मृत्य सादरम्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 17 ॥

योहान्न मेन्डलः क्रैस्तधर्मार्चकः
सस्यरोपणविधौ यन्त्रितपरीक्षणान्
निर्वाह्य वंशानुगतगुणानां विधीन्
सम्यङ्न्यरूपयत् हन्त स्वजीविते
ख्यातिं न लब्धवान् तद्गुणान् संस्मृत्य
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 18 ॥

मेण्डलीफ्नामरसशास्त्रवित् पाणिनेः
वर्णमालाक्रमात्स्फुरितधीः व्यरचयत्
मूलवस्त्वणुभारमनुसृत्य समुचितम्
क्रमबद्धगुणगणाधृतफलकमद्भुतम्
येन नवमूलवस्त्वस्तित्वमवगतम्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 19 ॥

कान्तीयवैद्युतक्षेत्रयोर्वीचयो
आकाशमाध्यमे ज्योतिषो वेगेन
विसरन्ति दीप्तिरपि तदभिन्नवीचिर्हि
इति महासिद्धान्तमावृणोत् निशितधीः
जेम्स् क्लर्क माक्स्वलो संस्मृत्य तं मुदा
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 20 ॥

माक्स्-प्लान्कवर्यो निरदिशत् स्वमेधसा
ऊर्जाप्रसारणं खण्डशो भवतीति
मूलतत्त्वं येन भौतविज्ञानस्य
नूत्नमार्गोऽभवत् खण्डवादस्य वै
बीजवापनमभूत् स्मरन्तो तां कृतिम्
विज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 21 ॥

दास्यभावव्यथितदेशेऽस्मदीये हि
सम्भूतवान् कोऽपि महनीयमानवः
तन्तुं विनाकाशमाध्यमे प्रसरण-
विद्युत्तरङ्गस्य साध्यमिति निरदिशत्
जगदीशचन्द्रबसुमुज्ज्वलं स्मरन्तो
विज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 22 ॥

मरीक्यूरीत्यभिहितां निशितधीमतीम्
या स्वभर्त्रा साकमाविरकरोन्नूत्न-
मूलवस्त्वनुपमं रेडियंनामकम्
नोबेलुपायनं यस्यै प्रदत्तं द्वि-
रद्वितीयां स्त्रियं स्मरन्तो सादरम्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 23 ॥

यो दीप्तिवेगस्य नित्यतामाधृत्य
दिक्कालमिथुनस्य सापेक्षतां तथा
द्रव्यशक्तिद्वयस्यान्योन्यसमतां च
संस्थापयामास संस्मृत्य तं गुरुम्
ऐन्स्टैनमाल्बर्टुपाह्वममितप्रभम्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 24 ॥

श्रोडिङ्गरं नमत भौतशास्त्राग्रणीं
यो खण्डवादस्य जनक इति विश्रुतो
द्रव्यं कदाचिदप्यणुरूपतां भजेत्
अन्यदा वीचिवत् व्यवहरेदिति महा-
गणितमयवरसमीकरणेन साधितम्
येन तत्संस्कृतेस्ताडयत जयडिंडिमम् ॥ 25 ॥

सीविरामन्नामभारतसुताग्रणी
रामन्प्रभाव इति विदितामवेक्षणां
द्रव्याणुभिर्दीप्तिविकिरणप्रकरणे
साग्रहं सन्दर्श्य नोबेलुपायनं
वरभारतरत्नोपाधिमलभत महान्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 26 ॥

अलेक्सांडर् फ्लमिन्ग् वर्येण वैद्येन
सूक्ष्मगदजनकजन्तून्मूलने जयः
प्राप्तो नु पेनिसिलिनेत्याह्वभेषजात्
नोबेलुपायनं प्राप्तं च कोटिशः
रुग्णा निरामया अभवन् तदगदेन
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 27 ॥

वाट्सनं क्रिक्कर्यम् अतुलप्रभाविनौ
जीवशास्त्राङ्गणे यौ सर्वजीविनाम्
मूलेष्टकाभूतसत्त्वप्रकाशने
सफलतां प्राप्य खलु जगति कीर्तिं चापि
लब्धवन्तौ नमत सत्यसंशोधकौ
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 28 ॥

सङ्गणकयन्त्रस्य जनक इति विश्रुतं
ट्यूरिङ्गनामानम् आङ्गलदेशस्थितं
विश्वसमरे आङ्गलदेशजयकारणम्
सार्वत्रिकं गणकयन्त्रमाविष्कृत्य
शाश्वतयशोभाजनं गण्यमादृत्य
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 29 ॥

ट्रान्सिस्टरिति लोकविदितोपकरणाद्धि
नवविविधसौकर्यगणजन्मसाध्यता
तत्सम्भवे मुख्यकारणजनत्रयान्
षाक्लीमहोदयं ब्रट्टैनबार्डीन
वर्यौ च तत्साधितं चैव संस्मृत्य
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 30 ॥

शेषभागःसप्तमपुटे

षष्टमपुटस्य शेषभागः **विज्ञानसंस्कृतिः.....**

प्रथमकृतकोपग्रहं स्पुट्निकं स्मरत
शश्युपग्रहतले प्रथमतो न्यस्तांघ्रि-
मप्रतिमसाहसं तं मानवं नमत
तत्कार्यसाधकानगणितान् च स्मरत
व्योमयानज्ञानसफलतां च स्मरत
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 31 ॥

गणकयन्त्राधारदूरवाक्केन्द्राणि
कृत्रिमग्रहवाह्यसंवहनकेन्द्राणि
काचतन्तुस्तोमवाहिनीजालं च
संज्ञाप्रचारणे सौदामनीरयं
प्राकल्पयन्कन्दुकीकृतधरण्यां हि
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 32 ॥

व्योमशास्त्रज्ञेषु निष्णातमप्रतिम-
धीशालिनं चन्द्रशेखरं नक्षत्र-
-गणगात्रसीमानमधिकृत्य साधितः
चन्द्रमर्यादेति विख्यातवरविधिः
येन नोबेल्पदकजयिनं समादृत्य
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 33 ॥

स्वातन्त्र्यपूर्वभारतदेशसञ्जात-
विदितहरगोविन्दखोराननामान-
मद्भुतपरीक्षकं येन प्रदर्शितो
जीवसूत्रग्रथनमार्गः प्रयोगैश्च
स्मरन्तो नोबेलुपायनोपार्जकम्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 34 ॥

चलदूरवाण्यैव कर्षका वणिजश्च
कर्मकाराः स्वकार्यार्थमविरतमहो
सर्वत्र लीलया संलापमग्ना हि
वैद्युतान्तर्जालतन्त्रेण जगदिदं
करतलामलकवत् ज्ञानगोचरमभूत्
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 35 ॥

कृतकधीयन्त्राणि गगने पतङ्गवत्
डयने समर्थाणि शत्रुजननाशे च
चतुरङ्गखेलने वृद्धजनसेवने
गृहकार्यनिर्वहणतन्त्रे च मतिमतो
तद्यन्त्रसर्जने कारणान् संस्मृत्य
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 36 ॥

वैद्यशास्त्रे प्रगतिरवितर्क्यसफलतां
प्राप्ता नु नूत्नसफलागदाः मानवं
स्वस्थं प्रकुर्वन्ति शल्यतन्त्रज्ञास्तु
अन्यदेहाङ्गानि लीलया युञ्जते
रोबोटयन्त्राणि शस्त्रवैद्यास्त्वहो
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 37 ॥

विज्ञानयाने तु वेगेन सञ्चलति
भूगतोर्जाव्ययात् उष्णतात्वेधते
हिमानी प्रवहति च जलसंप्लवो भवति
वर्धते सागरः सीमानमुल्लङ्घ्य
कृच्छ्स्य वारकःविज्ञानमेवास्ति
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 38 ॥

जलवायुभूमिप्रदूषणमनियमितम्
प्राणिनामन्तकः सद्यो भवेदिति हि
कथयन्ति विज्ञानिनो शृणुत तान् जनाः
र्वथा प्रकृतिप्रदूषणस्तम्भनं
कार्यमित्यवगम्य तत्कर्म साधयत
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 39 ॥

विज्ञानमुत्कृष्टसाधनं केवलम्
मनुजो विविच्य तत् जनहितं साधयेत्
उपयुज्य सादरं नो चेद्विनाशो हि
सकलजगतोऽस्माद् हि कारणात् ज्ञानेषु
मानवविवेचनज्ञानमतिरिच्यते
तज्ज्ञानसंस्कृतेस्ताडयत जयडिंडिमम् ॥ 40 ॥

# संस्कृतभाषया लब्धुं शक्याः वृत्तयः

-मायाराम-उनियालः
अनुसन्धाता
श्रीलालबहादुरशास्त्रीराज्ट्रियसंस्कृतविद्यापीठम्

प्रायशोऽखिलभाषाणां जननीयं संस्कृतभाषा एव। संस्कृतभाषात एव ग्रीक्, लेटिन्प्रभृतयो निखिला जगद्भाषाः प्रादुरभूवन्निति भाषातत्त्वविदाम् आघोषः। अस्या भाषाया एवेदम् अनितरसाधारणं गौरवं यद् विश्वपुस्तकालयस्य प्राचीनतमा ग्रन्था ऋग्वेदादयः संस्कृतसाहित्यमन्दिरस्यैव स्वर्णकलशायमानाः संस्कृतभाषाललामभूता विलसन्ति। एतदप्यत्रावधेयं भवति यद् विश्वसाहित्यालङ्कारभूतं संस्कृतसाहित्यं न केवलं भारतवर्षमेव आत्मीयत्वेनानुबध्नाति अपि त्वखिलं जगदेवेदं क्रोडीकरोति। यतः सर्वा एव भाज़ा यया कयाऽपि विधया संस्कृतभाषाया अधमर्णतामावहन्ति। यतः सर्वास्वेव भाषासु अद्यापि बहवः संस्कृतशब्दाः प्रयुज्यमानाः दृष्टिपथमावहन्ति। प्रचलितासु विश्वभाषासु संस्कृतभाषैव प्राचीनतमेति सर्वसम्मतः पक्षः। संस्कृतभाषेयं भारती-देववाणी-विद्येति पदैरप्याख्यायते। पौरस्त्यपाश्चात्यप्रदेशेषु प्रचुरप्रचाराः ग्रीक्लैटिन्ट्यूटानिकफ्रेञ्चजर्मन्इंग्लिशादिसमस्ता भाषापदवीमारूढा लोकगिरः संस्कृतमहासरित्सकाष्ठादेव निष्क्रान्ता इति भाज़ातत्त्वविदोऽप्यभिमन्यन्ते।

भाषोच्चारणौपयिका यावन्तः कण्ठताल्वादिस्थानविशेषसमुद्भूता ध्वनिविशेषा न तावन्तः सर्वे संस्कृतं विहाय अन्यासु भाषासु सम्भवन्ति। परञ्च संस्कृतशब्दकोशः खल्वपूर्वः। एकैकस्य वस्तुनोऽनेकानि नामानि विलसन्ति। यथा सूर्यस्य पर्यायवाचित्वे **'खगविहङ्गवियन्मणिभानवो हरिभगेननिदाघकराद्वयः। दिनमणिस्तरणिश्चदिनप्रणीः।'** इत्यपूर्णश्लोकेनैव कियन्ति नामानि समुपश्लोकितानि। तदयमार्याणामस्माकं भाषेयं सर्वेतराद्यत्वात् सर्वथा धन्या सर्वमान्या च भवति। स्थाने एवोक्तं केनापि कविना-

**अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारती।**

पुरा प्राच्यविद्योपाधीनधिगतवतां स्नातकानामधिस्नातकानाञ्च कृते पुरा भाविनो जीवनस्य कृते सीमिता एवाऽवसरा अभूवन्। ते खलु विभिन्नेषु विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु वा संस्कृताध्यापकपदं, प्राध्यापकपदं वा लभेरन्, पौरोहित्य-कर्मकाण्डादिजु वा जनतामुपकुर्वन्तस्तस्याः प्रणीतीः स्वीकुर्युः। शिक्षाक्षेत्रात्, कर्मकाण्डक्षेत्राच्चेतरा बह्व्यो दिशोऽद्य प्रतीक्षन्ते संस्कृतभाषाभाषकानाम्। अखिलभारतीयप्राशासनिकसेवाप्रतियोगितासु, राज्यानां विभिन्नासु प्रतियोगिपरीक्षासु च संस्कृतमुपकारिविषयः (Scoring Subject) इति विदन्त्येवाऽऽधुनिकाः सुधियः। अतो बहवः प्रशासकाः संस्कृतविषये भूयसोऽङ्कान् लब्ध्वाद्य देशे विभिन्नानि पदान्यधितिश्न्तीति जानीम एव वयम्। भारतीयसंविधानस्य अष्टम्यामनुसूच्यामुल्लिखितासु द्वाविंशतिभाषासु संस्कृतं ससम्मानं परिगणितमिति प्रतियोगिपरीक्षासु संस्कृतमाध्यममपि स्वीकृतम्, 1980ई.वत्सरात् संस्कृतमाध्यमेन भारतीयप्रशासनिकसेवापरीक्षाप्रतियोगितासूत्तराणि शक्यन्ते दातुमिति विहितमस्ति।

अद्य हि जनसञ्चारमाध्यमानां लोकप्रियता सुविदिताऽस्ति। मीडिया इत्याख्यमिदं क्षेत्रं मुद्रितप्रसारितेति भेदद्वये विभाजितमस्ति (Print media and Electronic media)। समाचारपत्राणि (यानि संस्कृते वार्तापत्राणीत्युच्यन्ताम्), आकाशवाणी-दूरदर्शनप्रणालिकाश्च युगेऽस्मिन् न केवलं नागरिकाणामपितु ग्रामीणानामपि दिनचर्याया अभिन्नमङ्गमिति जानीम एव वयम्। सौभाग्यमिदमस्माकं यत् सर्वेष्वेवैतादृशेषु क्षेत्रेषु प्राचीनतमा सत्यपि संस्कृतभाषेयं येन केनापि रूपेणास्तु, विराजतेऽवश्यम्। संस्कृतभाषया लब्धुं शक्याः वृत्तयः केषु क्षेत्रेषु सन्ति इति यथाज्ञानं प्रस्तूयते-

पर्यावरणविज्ञानक्षेत्रे(वैदिकविज्ञानम्) अध्यापकक्षेत्रे धर्मगुरुक्षेत्रे गणितक्षेत्रे नासा, इस्रो इत्यादिवैज्ञानिकसांस्थानिकक्षेत्रे अनुवादकक्षेत्रे संशोधनक्षेत्रे संगणकक्षेत्रे प्रवचनक्षेत्रे न्यायालयक्षेत्रे (वकील्) आपदाप्रबन्धनक्षेत्रे सांस्कृतिकक्षेत्रे विद्युत्क्षेत्रे मौसमक्षेत्रे ज्यौतिषक्षेत्रे पौरोहित्यक्षेत्रे दार्शनिकक्षेत्रेयोगक्षेत्रे धर्मक्षेत्रे चेत्यादिषु क्षेत्रेषु संस्कृतभाषया वृत्तिं प्राप्य आधुनिकसमस्यानां समाधानं सम्भविष्यन्ति। संस्कृतभाषात्मकशोधमाध्यमेन आधुनिकसमस्यानां समाधानं तदैव भवितुम् अर्हति यदा तस्याः संस्कृतभाषायाः वैशिष्ट्यम्, लोकोपयोगित्वम्, व्यावहारिकत्वम्, तया भाषया लब्धुं शक्याः का वृत्तयः, सामाजिकसम्बन्धः, ग्रामक्षेत्रजनपदराज्यदेशविश्वेषु च शान्तिस्थापनम् इत्यादिविषयेषु संस्कृतभाषादक्षताम् अवगच्छामः। यतो हि कस्या अपि भाषाया माध्यमेन यदि आधुनिकसमस्यानां समाधानं वाञ्छामो वयं तर्हि तस्या भाषायाः व्यापकत्वविषये जिज्ञासा भवति। अतः पूर्वं सर्वासां जिज्ञासानां समाधानं यावन्न भवति तावत् तया भाज़या आधुनिकसमस्यानां समाधानं भवितुं नार्हति।

वर्तमानो विज्ञानस्य युगो गण्यते। विज्ञानं जीवनस्य प्रत्येकं पक्षं प्रभावयति। आर्थिकं सामाजिकं राष्ट्रीयम् अन्ताराष्ट्रियं च सर्वमेव एतत् प्रभावयति। आविष्काराणां तादृशी प्रगतिरभूद् या सर्वथा आश्चर्यम् आवहति। समग्रं विश्वं वैज्ञानिकानां नवीनं नवीनम् आविष्कारम् अवलोक्य आश्चर्यचकितमिव वर्तते। अद्यत्वे न कोऽपि पक्षो वर्तते, यत्र न विज्ञानस्य प्रवेशः। विज्ञानं सततम् अनुसन्धानेन प्रत्यहं नूतनानाम् आविष्काराणां प्रभावेण मानवस्य सुखसुविधां प्रवर्धयति। सुविशालानि यन्त्रालयानि यन्त्राणाम्, इलेक्ट्रॉनिक-सूक्ष्म-उपकरणानां च प्रयोगेण मानव-सेवायाम् अहर्निष्ठां प्रयत्नशीलानि। अत एव मानवो यद् इच्छति तत्तद् विज्ञानेन उपस्थाप्यते।

अद्यत्वे संगणकस्य (Computer) आविष्कारो विज्ञानस्य सर्वोत्कृष्टा उपलब्धिः। संगणकः सर्वासु विधासु अपेक्ष्यते। यत् किञ्चिदपि कार्यं तत्र संगणकः आवश्यकः। संस्कृतभाषा संगणकस्य उपयोगेन कथं प्रचारं प्रसारं च लभेत। संस्कृतभाषा कथं संगणकस्य कृते उपयुक्ता प्रयुक्ता च भवेत्। कथं संस्कृतभाषालेखने पठने पाठने शिक्षणकार्ये च प्रयोगः संगणकमाध्यमेन सिध्येत्। संस्कृते संगणके च संबन्धः स्यात् यथा शोधादिकार्यादिकं संगणकमाध्यमेन प्रवर्तितं स्यात्। इत्येतदेवात्र समासतो विविच्यते विव्रियते च। संगणकदृष्ट्या संस्कृतभाषायाम् एते विशिष्टा गुणाः सन्ति। ये संस्कृतस्य कम्प्यूटरोपयोगित्वं साधयन्ति। न कस्यामपि भाज़ायां संगणकदृष्ट्याऽपेक्षिता एते गुणा उपलभ्यन्ते।

किञ्च नात्र काचन विप्रतिपत्तिर्यद् विज्ञानेन बहुविधाः सुविधाः प्रदत्ताः। जीवनं सुखकरं कृतम्, मानवहितसाधनं विहितम्, वैज्ञानिकी समुन्नतिर्विहिता। विज्ञानस्य यथैव लाभाः तथैव दोषा अपि सन्ति। यदि दोज़ाणां निराकरणं क्रियते तर्हि विज्ञानं वरदानरूपं भविष्यति। किञ्च तस्य विज्ञानस्य दोषाणां निराकरणं संस्कृतमाध्यमेन एव भवितुमर्हति। यथा विज्ञानेन अग्नेरुत्पत्तिः शक्या अस्ति, परन्तु तस्य अग्नेरुपयोगः भोजनपाकार्थं गृहध्वस्तीकरणेऽपि भवति। विज्ञानमेतत् स्वयं निर्णयं कर्तुमसक्षमः अस्ति। एतन्निर्णयं तु संस्कृतनिष्ठधर्म एव कर्तुं सक्षमो भवति। तथा च विज्ञानजन्यशक्तेः दिशानिर्देशमपि संस्कृतनिष्ठधर्म एव करोति।

अतो भारतीया संस्कृतिः सर्वप्राचीनाः सर्वजनानुकरणीया चास्ति। सा हि संस्कृतिः संस्कृताश्रिता उच्यते। यतोहि भारतीयसंस्कृतेः यानि मूलानि तत्त्वानि सन्ति तानि सर्वाण्यपि संस्कृतवाङ्मये निहितानि सन्ति। संस्कृताश्रिता संस्कृतिः परकीयभावनां दूरीकरोति समाजात्। यदा समाजः सर्वत्र आत्मानम् आत्मनि च सर्वं पश्यति तदा तस्य कृते कोऽपि परकीयः नावशिष्यते, तथा सति तस्य मनसि कस्यापि कृते द्वेषभावना न जागर्ति, द्वेषभावनायाः अभावे स सर्वैः सह बन्धुभावं धारयति। एतादृशः समाजः उदारचेताः कथ्यते। तदुक्तम्-

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्॥**

संस्कृतवाङ्मये एतादृशानि असंख्यानि उपदेशवाक्यानि सन्ति यत्र एतादृशी भावना निहिता वर्तते। अस्माकं जीवने आचरणे व्यवहारे च सर्वत्रैव पाश्चात्यसंस्कृतेः प्रभाव अवलोक्यते। इदन्तु सत्यं यत् एतत् कारणेन विश्वसमाजः भौतिकोन्नतेः शिखरमारूढः किन्तु आध्यात्मिकपतनं नितान्तं चिन्तायाः विषयः। वैश्वीकरणप्रक्रियया अवश्यमेव समग्रस्यापि विश्वस्य एकसूत्रतासम्पादनक्रमे महान् उपकारः कृतः किन्तु तदपि भौतिकस्तरे एव दृश्यते। यावत् पर्यन्तं समाजे हृदयस्य भावनायाः चिन्तनस्य विचाराणां च समन्वयो न भवति तावत् पर्यन्तं वैश्विकोन्नतेः सर्वेऽपि प्रयासाः निरर्थका एव भविष्यन्ति। आध्यात्मिकोन्नतेरेव कस्यापि समाजस्य वास्तविकी उन्नतिः। सा सन्तोषं जनयति। भौतिक-उन्नतिस्तु लोभजनिका, लोभवशाद् एव एकः समाजः

शेषभागःअष्टमपुटे

# अस्माकं देशं कला-संस्कृति-भाषया एव एकस्मिन् सूत्रे ग्रथितमिति -कपिलमिश्रः

-दिनेशशर्मा







संस्कृतभाषा सर्वासां भाषाणां जननी मता । सर्वविदितमस्ति यत् संस्कृतस्य शास्त्रैरेव भारतं पुरा विश्वगुरुरिति मन्यते स्म । संगीतस्य उत्पत्तिः सामवेदात् अभवत् । सामवेदसम्बद्धग्रन्थेषु च संगीतस्य विषये विस्तृतं विवेचनं वर्तते । अस्माकं देशः कला संस्कृति-भाषया एव एकस्मिन् सूत्रे निबद्धमस्ति भविष्यति च । विचारोऽयं दिल्लीसंस्कृताकादम्या दिल्लीसर्वकारेण लिटिलथियेटरग्रुपमण्डीहाऊसस्थे समायोजिते संस्कृतसंगीतसंध्यायाः अवसरे कार्यक्रमस्य शुभावसरे दिल्लीसर्वकारस्य कलासंस्कृतिभाषापर्यटन एवं जलविभागाणां मन्त्री श्रीकपिलमिश्रमहोदयेन प्रतिपादितः । श्रीमिश्रमहोदयेन कथितं यत् ऐतिहासिकप्रमाणैः भारतीयसंगीतं परिज्ञाय नैके वैदेशिकाः संगीतज्ञाः प्रभाविताः अभवन् । संगीतं कश्चित् धर्म-सम्प्रदायविशेषस्य वा विधा नैव वर्तते अपितु सवेषां धर्माणां सर्वासां जातीनां सम्प्रदायानां च समत्वस्य मानवजातेः विधा वर्तते । संगीतस्य विविधरागाणां माध्यमेन विविधतायामेकतायाः सन्देशं शिक्ष्यति । एभिः च कार्यक्रमैः संस्कृतस्य विकासाय दिल्लीसर्वकारस्य प्रयासाः सार्थकाः दृश्यन्ते ।

अस्मिन् अवसरे दिल्लीसंस्कृताकादम्याः सचिवेन डॉ. जीतरामभट्टमहोदयेन कथितं यत् अद्य येषां गीतानां प्रस्तुतिः क्रियते तेषां गीतानां स्वरांकनं पूर्व तृष्णासमूहेन कृतमस्ति तेषामेव गीतानां प्रस्तुतिः अस्तित्वबैण्ड इति समूहेन आधुनिकपाश्चात्यपवाद्यैः क्रियते । अकादम्याः उद्देश्यं मूलसंस्कृतं पाश्चात्यसंगीतमाध्यमेन जनेषु प्रचारं प्रसारं चास्ति । अस्मिन् कार्ये च सफलता प्राप्यते । डॉ.भट्टमहोदयेन कथितं यत् दिल्लीसंस्कृताकादम्या भाषाविभागेन अस्याः संस्कृतसंगीतसध्यायाः आयोजनं क्रियते । यत्र भारतीयसंगीतेन स्वरतृष्णा इति समूहः गीतानां प्रस्तुतिः करिष्यति तत्रैव देहल्याः सुप्रसिद्ध अस्तित्ववैण्ड इति समूहः तेषामेव गीतानां प्रस्तुतिः पाष्ठचात्यसंगीतमाध्यमेन करिष्यति अयमवे कार्यक्रमस्यास्य आकर्षणकेन्द्रं भविष्यति ।

अस्मिन् असवरे दिल्लीसर्वकारस्य भाषविभागस्य सचिवः श्रीरमेशतिवारीमहोदयः उक्तवान् यत् दिल्लीसर्वकारेण संस्कृतभाषायाः विकासाय अस्याः उपयोगिता सिद्धयर्थं च देहल्यां विविधेषु स्थानेषु नैकविध संस्कृतविषयकप्रेरणाप्रदायाकानां कार्यक्रमाणां योजनानां च क्रियान्वनं क्रियते । एभिः कार्यक्रमैः योजनाभिश्च देहल्यां संस्कृतभाषायाः नैरन्तर्येण प्रचारः प्रसारश्च जायते ।

अस्मिन् अवसरे अकादम्याः उपाध्यक्षः प्रो.गणेशदत्तशर्मा कथितवान यत् देशस्य सर्वेषां राज्यानां तुलनायां देहल्यां संस्कृतभाषायाः सर्वाधिकं विकासं दृश्यते । संस्कृताकादम्याः प्रयासैः देहल्यां प्रतिवर्षं नैकाः विद्यार्थिनः संस्कृतस्य गौरवं वर्धयन्ति । अद्यत्वे आधुनिके युगे शिक्षायाः क्षेत्रे देहल्याः प्रायशः सर्वेषां विद्यालयानां महाविद्यालयानां च विद्यार्थिनः संस्कृताध्ययने उत्साहिनः दृश्यन्ते । अस्मिन्नवसरे नैके गणमान्याः जनाः उपस्थिताः आसन् ।

सप्तमपुटस्य शेषभागः **संस्कृतभाषया लब्धुं....**

अन्यं समाजम् आक्रमते, स्वं(धनम्) च तस्य आहरति। अवसरं प्राप्य अन्योऽपि समाजः तमाक्रमते। एतेन मिथो वैरभावः समुदेति। संस्कृतमन्यस्वापहारात् न केवलं वारयति प्रत्युत स्वीयं स्वमपि अन्यस्मै पात्राय समर्पयितुमुपदिशति। उक्तञ्च श्रुतौ-

**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।**

**॥ जयतु संस्कृतम्। जयतु भारतम् ॥**


## पाठकानां कृते सूचनाः-

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**


# संस्कृत-शिशुकविता-पाठोत्सवः

-नारायणदासः

नरेन्द्रपुरम्। सहर्षमिदं विज्ञाप्यते यत् सप्ताम्बर-मासस्य ऊनत्रिंशद्दिनाङ्के पुदुच्चेरीस्थ-संस्कृत-बालसाहित्य-परिषत्पक्षतः एकः सस्कृत-शिशुकविता-पाठोत्सवः आयोजितः आसीत् यत्र पञ्चदशाः



कवयः स्वरचितानि बालपद्यानि अपठन्। उत्सवोऽयं कोलकतानगरे नरेन्द्रपुरस्थ-श्रीरामकृष्ण-मिशन्-आवासीय-महाविद्यालयस्य परिसरे आयोजितः आसीत् एतादृशः संस्कृत-शिशुकविता-पाठोत्सवः अभूतपूर्पः इति सेर्वेषां मतमासीत्। ऐदम्प्राथम्येन आयोजिते अस्मिन् शिशुकविता‌पाठोत्स्वे अध्यक्षपदं समलङ्कृतवान् आसीत्। संस्कृत-बालसाहित्य-परिषदः प्रतिष्ठाता सम्पदानन्दमिश्रमहोदयः अस्य कार्यक्रमस्य संयोजनकरोत्। समुपस्थिताः कवयः सुललितस्वरेण स्वविरचितबालोपयोगिपद्यानां पाठमकुर्वन्। अवसरेऽस्मिन् पठितेषु बालकवितासु सुश्रीपराम्बायोगमायायाः कविता सर्वोत्तमा आसीत् इति हेतोः सा संस्कृतबालसाहित्य-परिषत्पक्षतः एकाधिकैकसहस्त्ररूप्यकैः सभाजिता। अन्येषां कवीनां मध्ये आसन् नारायणदाशः, बनमालीबि श्वालः, पूर्णचन्द्र उपाध्यायः, कालिप्रसादमिश्रः, सुनिता वर्मन्, अशोक शतपथी, अजयकुमारमिश्रः तथा अन्ये च। पद्मश्री-रमाकान्तशुक्लमहोदयः, श्रीमान् राधावल्लभ त्रिपाठिमहोदयः, सम्पदानन्दमिश्रः च स्वरचिताः बालकविताः अपठन्।

**सप्तवर्णचित्रपतङ्गः इति बालपुस्तकस्य लोकार्पणम्**

अस्मिन् उत्सवे संस्कृत-बालसाहित्य-परिषत्- पक्षतः प्रकाशितस्य सप्तवर्णचित्रपतङ्गः इति शीर्षकान्वित-पुस्तकस्य उन्मोचनमप्यभवत्। पुस्तमकमिदं चित्रमयं वर्णमयं च। अत्र नितान्तं



सरलया भाषाया एकस्य विद्यालयस्य बालैः निर्मितस्य गल्पस्य संस्कृतरुपान्तरं प्रकाशितम् अस्ति। पुस्तकमिदं बालेषु संस्कृतप्रीतिं जनयितुं सर्वथा समर्थमिति समुपस्थितैः सर्वैरतिथिभिः प्रतिपादितम्।

**संस्कृत-बालसाहित्यपरिषदः द्वितीयं वार्षिकोपवेशनम्**

अक्टोबरमासस्य प्रथमदिनाङ्के संस्कृत-बालसाहित्यपरिषदः द्वितीयं वार्षिकोपवेशनं तत्रैव नरेन्द्रपुरे समायोहितम् आसीत्। अस्मिन् उपवेशने बनमालीविश्वालः नारायणदाशः तन्मयकुमारभट्टचार्यः अजयकुम्रमिश्रः पुर्णचन्द्रोपाध्यायः पराम्बा योगमाया च समुपस्थिता आसन्। अवसरेस्मिन् परिषदः प्रतिष्ठाता सम्पदानन्दमिश्रः परिषदः नानाविधकार्यवलिविषये समुपस्थितसदस्यान् बोधितवान्। संस्कृते उत्तमबालसाहित्यनिर्माणम् समुपलब्धबालसाहित्यानां सङ्ग्रहणम् बालसाहित्यकाराणा सूचिनिर्माणम् इत्येतादृशानां संस्कृतबालसाहित्यमधिकृत्य नानाविषयाणां चर्चा सदस्यैः विहिता। गतवर्षे अक्टोबरमासे पुदुच्चेर्यां समनुष्टिते परिषदः प्रथममुपशने चर्चितानां विषयाणां परिशीलनं अपि सदस्यैः कृतम्।


अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- संदीपउपाध्याय, सन्नीकुमार, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,



स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।